

# Sri Varaha Sahasranama Stotram – Skanda Puranam

## ॥ श्री वराह सहस्रनाम स्तोत्रम् - श्री स्कान्द पुराणम् ॥

This following is a very rare **Varaha Sahasranama Stotram** from **Skanda Puranam, Srimushna Mahatmyam**. This Sahasrnama is not to be found in the print edition of Skanda Purana. This Sahasranama relates to **Srimushnam** (one of the eight **Svayam Vyakta Kshetras**) in Tamil Nadu (near **Vriddhachalam**/**Chidambaram**) and **Sri Bhuvaraha Swamy** and was given to **Lord Shiva** by **Lord Varaha**.

The conversation between **Lord Shiva** and **Goddess Parvati** in **Purva Pithika** (Prologue) and **Phalashruti** bring out clearly the sacredness of this Sahasranama. A quick summary (only excerpts of benefits one can accrue by chanting this Sahasranama:

- Destroyal of crores of sins, poverty, deadliest of diseases such as leprosy, planetary afflictions, fear from enemies/animals/ghosts, etc.
- Bestowal of all auspicious and immutable wealth, Punya, kingdom (or ownership of landed property in current context), birth of a king in the clan, administrative (managerial) positions, accrual of knowledge, victory, comforts, etc. In short, the chanter never sees any inauspicious deeds in his/her life.

श्री शङ्कर उवाच -

यः पूजयेत् परमात्मानं श्रीमुष्णेशं महाप्रभुम् ।
वराहस्य सहस्रेण नाम्ना पुष्प सहस्रकैः ।
हत कण्टक साम्राज्यं लभते नात्र संशयः ॥ १ ॥

श्री पार्वत्युवाच -

किं तन् नाम सहस्रं मे येन साम्राज्यं आप्नुयात् ।
ब्रूहि शङ्कर तत् प्रीत्या वराहस्य महात्मनः ॥ २ ॥

श्रुत्वा वाराह माहात्म्यं न तृप्तिर् जायते क्वचित् ।
को ऽ नुतृप्येत तनु भृत् गुण सार विदां वर ॥ ३ ॥

श्री शङ्कर उवाच -

श्रुणु देवी प्रवक्ष्यामि पवित्रं मङ्गलं परम् ॥ ४ ॥

धन्यं यशस्यं आयुष्यं गोप्यात् गोप्य तरं महत् ।
इदं पुरा न कस्यापि प्रोक्तं गोप्यं तवापि च ॥ ५ ॥

तथा ऽ पि च प्रवक्ष्यामि मदङ्गार्ध शरीरिणी ।
सदाशिवो ऋषिः सास्य वराहो देवता स्मृतः ॥ ६ ॥

छन्दो ऽ नुष्टुब् विश्वनेता कीलकं च शराग्र भृत् ।
ह्रीं बीजं अस्त्रं क्लींकारः कवचं श्रीं इहोच्यते ॥ ७ ॥

विश्वात्मा परमो मन्त्रो मन्त्र राजमुदीरयेत् ।
हुंकारं हृदये न्यस्य वराहयेति मूर्धनि ॥ ८ ॥

भूर्भुवः स्वः शिखायां च नेत्रयोर् भूपतिं न्यसेत् ।
सर्वज्ञाय नमो ऽ स्त्रं च श्रीं ह्रीं क्लीं हुं च भूमपि ॥ ९ ॥

हां हीं हूं हैं हौं ह इति स्वीयाङ्गुष्ठ द्वयादिकः ।
एवं स्वाङ्ग कृत न्यासो मन्त्रमेतमुदीरयेत् ॥ १० ॥

इज्यो योगप्रियो नेता यज्ञ पृष्ठो वृकोदरः ।
सूत्र कृल् लोक सूत्रं च चतुर्मूर्तिः चतुर्भुजः ॥ ११ ॥

## ॥ विनियोगः ॥

अस्य श्रीवाराह सहस्रनाम स्तोत्र महामन्त्रस्य । श्रीसदाशिवो ऋषिः । अनुष्टुप् छन्दः । श्रीवराहो देवता ॥

विश्वनेता इति कीलकम् । ह्रीं बीजम् । क्लीं अस्त्रम् । श्रीं कवचम् । विश्वात्मने नमः इति परमो मन्त्रः । हुंकाराय नमः इति हृदये । वराहाय नमः इति मूर्धनि । भूर्भुवस्सुवः इति शिखे । भूपतये नमः इति नेत्रयोः । सर्वज्ञाय नमः इत्यस्त्रम् । श्री वाराह प्रीत्यर्थे सहस्रनाम जपे विनियोगः ॥

## ॥ कर न्यासः ॥

हां अङ्गुष्ठाभ्यां नमः ।
हीं तर्जनीभ्यां नमः ।
हूं मध्यमाभ्यां नमः ।
हैं अनामिकाभ्यां नमः ।
हौं कनिष्ठिकाभ्यां नमः ।
हः कर तल कर पृष्ठाभ्यां नमः ॥

## ॥ हृदयादि न्यासः ॥

हां हृदयाय नमः ।
हीं शिरसे स्वाहा ।
हूं शिखायै वषाट् ।
हैं कवचाय हुं ।
हौं नेत्र त्रयाय वौषट् ।
हः अस्त्राय फट् ।
भूर्भुवस्सुवरोम् इति दिग् बन्धः ॥

## ॥ ध्यानम् ॥

नमः श्वेत वराहाय नमस्ते परमात्मने ।
लक्ष्मी नाथाय नाथाय श्रीमुष्ण ब्रह्मणे नमः ॥ १ ॥

इज्यो योगप्रियो नेता यज्ञ पृष्ठो वृकोदरः ।
सूत्र कृल् लोक सूत्रं च चतुर्मूर्तिः चतुर्भुजः ॥ २ ॥

## ॥ हरिः ॐ ॥

श्रीवराहो भूवराहः परञ्ज्योतिः परात्परः ।
परम पुरुषः सिद्धः विभुर् व्योमचरो बली ॥ १ ॥

अद्वितीयः परंब्रह्म सच्चिदानन्द विग्रहः ।
निर्द्वन्द्वो निरहङ्कारो निर्मायो निश्चलो ऽ मलः ॥ २ ॥

विशिखो विश्वरूपश् च विश्वधृक् विश्वभावनः ।
विश्वात्मा विश्वनेता च विमलो वीर्य वर्द्धनः ॥ ३ ॥

विश्वकर्मा विनोदी च विश्वेशो विश्व मङ्गलः ।
विश्वो वसुन्धरा नाथो वसुरेता विरोध हृत् ॥ ४ ॥

हिरण्यगर्भो हर्यश्वो दैत्यारिर् हर सेवितः ।
महातपा महादर्शो मनोज्ञो नैक साधनः ॥ ५ ॥

सर्वात्मा सर्व विख्यातः सर्व साक्षी सतां पतिः ।
सर्वगः सर्व भूतात्मा सर्व दोष विवर्जितः ॥ ६ ॥

सर्व भूत हितो ऽ सङ्गः सत्यः सत्य व्यवस्थितः ।
सत्यकर्मा सत्यपतिः सर्व सत्य प्रियो मतः ॥ ७ ॥

आधिव्याधिभियो हर्ता मृगाङ्गो नियम प्रियः ।
बल वीरस् तपद्ः श्रेष्टो गुण कर्ता गुणी बली ॥ ८ ॥

अनन्तः प्रथमो मन्त्रः सर्व भाव विद् अव्ययः ।
सहस्रनामा चा ऽ नन्तो ऽ नन्तरूपो रमेश्वरः ॥ ९ ॥

अघात निलयो ऽ पारो निराकारो निरायुधः ।
अमोघ धृक् अमेयात्मा वेद वेद्यो विशां पतिः ॥ १० ॥

विहृतिर् विभवो भव्यो भवहीनो भवान्तकः ।
भक्तप्रियः पवित्राङ्घ्रिः सुनासः पवनार्चितः ॥ ११ ॥

भजनीय गुणो ऽ दृश्यो भद्रो भद्र यशा हरिः ।
वेदान्तकृत् वेदवन्द्यो वेदाध्ययन तत्परः ॥ १२ ॥

वेदगोप्ता धर्मगोप्ता वेदमार्ग प्रवर्त्तकः ।
वेदान्त वेद्यो वेदात्मा वेदातीतो जगत्प्रियः ॥ १३ ॥

जनार्दनो जनाध्यक्षो जगदीशो जनेश्वरः ।
सहस्रबाहुः सत्यात्मा हेमाङ्गो हेम भूषणः ॥ १४ ॥

हरिदाश्व प्रियो नित्यो हरिः पूर्णो हलायुधः ।
अम्बुजाक्षो ऽ म्बुजाधारो निर्जरश् च निरङ्कुशः ॥ १५ ॥

निष्ठुरो नित्य सन्तोषो नित्यानन्द पद प्रदः ।
निर्जरेशो निरालंबो निर्गुणो ऽ पि गुणान्वितः ॥ १६ ॥

महामायो महावीर्यो महातेजा मदोद्धतः ।
मनो ऽ भिमानी मायावी मानतो मान लक्षणः ॥ १७ ॥

मन्दो मानी मनः कल्पो महाकल्पो महेश्वरः ।
मायापतिर् मानपतिर् मनसः पतिर् ईश्वरः ॥ १८ ॥

अक्षोभ्यो बाह्य आनन्दी अनिर्देश्यो ऽ पराजितः ।
अजो ऽ नन्तो ऽ प्रमेयश् च सदानन्दो जनप्रियः ॥ १९ ॥

अनन्त गुण गंभीरः उग्र कृत् परिवेष्टनः ।
जितेन्द्रियो जितक्रोधो जितामित्रो जयो ऽ जयः ॥ २० ॥

सर्वारिष्टार्तिहा सर्व हृदन्तर निवासकः ।
अन्तरात्मा परात्मा च सर्वात्मा सर्व कारकः ॥ २१ ॥

गुरुः कविः किटिः कान्तः कञ्जाक्षः खग वाहनः ।
सुशर्मा वरदः शार्ङ्गी सुधासाभीष्टदः प्रभुः ॥ २२ ॥

झिल्लिका तनयः प्रेषी झिल्लिका मुक्ति दायकः ।
गुणजित् कथितः कालः क्रोडः कोलः श्रमापहः ॥ २३ ॥

किटिः कृपापरः स्वामी सर्वधृक् सर्वगोचरः ।
योगाचार्यो मतो वस्तु ब्रह्मण्यो वेद सत्तमः ॥ २४ ॥

महा लंबोष्ठकश् चैव महादेवो मनोरमः ।
ऊर्ध्व बाहुर् इभ स्थूलो श्येनः सेनापतिः खनिः ॥ २५ ॥

धीर्गायुः शङ्करः केशी सुतीर्थो मेघ निःस्वनः ।
अहोरात्रः सूक्तवाकः सुहृन् मान्यः सुवर्चलः ॥ २६ ॥

सारभृत् सर्वसारस् च सर्वग्रहः सदागतिः ।
सूर्यश् चन्द्रः कुजो ज्ञश् च देव मन्त्री भृगुः शनिः ॥ २७ ॥

राहुः केतुर् ग्रह पतिः यज्ञभृत् यज्ञसाधनः ।
सहस्रपात् सहस्राक्षः सोम कान्तः सुधाकरः ॥ २८ ॥

यज्ञो यज्ञपतिर् याजी यज्ञाङ्गो यज्ञवाहनः ।
यज्ञान्तकृत् यज्ञगुह्यो यज्ञकृत् यज्ञसाधकः ॥ २९ ॥

इडा गर्भः स्रवत् कर्णो यज्ञकर्म फल प्रदः ।
गोपतिः श्रीपतिः घोणः त्रिकालज्ञः शुचिश्रवाः ॥ ३० ॥

शिवः शिवतरः सूरः शिव प्रेष्ठः शिवार्चितः ।
शुद्ध सत्त्वः सुरार्तिघ्नः क्षेत्रज्ञो ऽ क्षरादि कृत् ॥ ३१ ॥

शङ्खी चक्री गदी खड्गी पद्मी चण्ड पराक्रमः ।
चण्डः कोलाहलः शार्ङ्गी स्वयंभूः अग्रिय भुग् विभुः ॥ ३२ ॥

सदाचारः सदारंभो दुराचार निवर्त्तकः ।
ज्ञानी ज्ञानप्रियो ऽ वज्ञो ज्ञानदो ऽ ज्ञानदो यमी ॥ ३३ ॥

लयोदक विहारी च सामगान प्रियो गतिः ।
यज्ञमूर्तिः ब्रह्मचारी यज्वा यज्ञ प्रियो हरिः ॥ ३४ ॥

सूत्रकृल् लोक सूत्रश् च चतुर्मूर्तिः चतुर्भुजः ।
त्रयीमयस् त्रिलोकेशस् त्रिधामा कौस्तुभोज्ज्वलः ॥ ३५ ॥

श्रीवत्स लाञ्छनः श्रीमान् श्रीधरो भूधरो ऽ र्भकः ।
वरुणो वारुणो वृक्षो वृषभो वर्द्धनो वरः ॥ ३६ ॥

युगादि कृद् युगावर्त्तः पक्षो मासो ऋतुर् युगः ।
वत्सरो वत्सलो वेदः शिपिविष्टः सनातनः ॥ ३७ ॥

इन्द्रत्राता भयत्राता क्षुद्रकृत् क्षुद्रनाशनः ।
महाहनुर् महाघोरो महादीप्तिः महाव्रतः ॥ ३८ ॥

महापादो माहाकालो महाकायो महाबलः ।
गंभीर घोषो गंभीरो गभीरो घुर्घुरस्वनः ॥ ३९ ॥

ओंकार गर्भो न्यग्रोधो वषट्कारो हुताशनः ।
भूयान् बहुमतो भूमा विश्वकर्मा विशांपतिः ॥ ४० ॥

व्यवसायो ऽ घमर्षश् च विदितो ऽ भ्युद्त्थितो महः ।
बलभिद् बलवान् दण्डी वक्र दंष्ट्रो वशो वशी ॥ ४१ ॥

सिद्धः सिद्धिप्रदः साध्यः सिद्ध सङ्कल्प ऊर्जवान् ।
धृतारिर् असहायश् च सुमुखो बडबामुखः ॥ ४२ ॥

वसुर् वसुमनास् साम शरीरो वसुधा प्रदः ।
पीताम्बरी वासुदेवो वामनो ज्ञान पञ्जरः ॥ ४३ ॥

नित्यतृप्तो निराधारो निःसङ्घो निर्जितामरः ।
नित्यमुक्तो नित्यवन्द्यो मुक्तवन्द्यो मुरान्तकः ॥ ४४ ॥

बन्धको मोचको रुद्रो युद्ध सेना विमर्द्दनः ।
प्रसारणो निषेधात्मा भिक्षुर् भिक्षुप्रियो ऋजुः ॥ ४५ ॥

महाहंसो भिक्षुरूपी महागन्धो महाशनः ।
मनोजवः कालकालो कालमृत्युः सभाजितः ॥ ४६ ॥

प्रसन्नो निर्विभावश् च भुविदारी दुरासदः ।
वसनो वासवो विश्व वासवो वासव प्रियः ॥ ४७ ॥

सिद्धयोगी सिद्धकामः सिद्धिकामः शुभार्थवित् ।
अजेयो विजयीन्द्रश् च विशेषज्ञो विभावसुः ॥ ४८ ॥

ईक्षामात्र जगत् स्रष्टा भ्रू भङ्ग नियताखिलः ।
महाध्वगो दिगीशेशो मुनिमान्यो मुनीश्वरः ॥ ४९ ॥

महाकायो वज्रकायो वरदो वायु वाहनः ।
वदान्यो वज्रभेदी च मधुहृत् कलि दोषहा ॥ ५० ॥

वागीश्वरो वाजसनो वानस्पत्यो मनोरमः ।
सुब्रह्मण्यो ब्रह्मधनो ब्रह्मण्यो ब्रह्म वर्द्धनः ॥ ५१ ॥

विष्टंभी विश्व हस्तश् च विश्वाहो विश्वतोमुखः ।
अतुलो वसुवेगो ऽ र्कः सम्राट् साम्राज्य दायकः ॥ ५२ ॥

शक्तिप्रियः शक्तिरूपो मारशक्ति विभञ्जनः ।
स्वतन्त्रः सर्व तन्त्रज्ञो मीमांसित गुणाकरः ॥ ५३ ॥

अनिर्देश्य वपुः श्रीशो नित्यश्रीर् नित्य मङ्गलः ।
नित्योत्सवो निजानन्दो नित्यभेदी निराश्रयः ॥ ५४ ॥

अन्तश्चरो भवाधीशो ब्रह्मयोगी कलाप्रियः ।
गोब्राह्मण हिताचारो जगद्धित महाव्रतः ॥ ५५ ॥

दुर्ध्येयश्च सदा ध्येयो दुर्वासादि विबोधनः ।
दुरापो दुर्धियां गोप्यो दूराद् दूरस् समीपगः ॥ ५६ ॥

वृषाकपिः कपिः कार्यः कारणः कारण क्रमः ।
ज्योतिषां मथन ज्योतिः ज्योतिश् चक्र प्रवर्त्तकः ॥ ५७ ॥

प्रथमो मध्यमस् तारः सुतीक्ष्णोदर्क कार्यवान् ।
सुरूपश् च सदावेत्ता सुमुखः सुजन प्रियः ॥ ५८ ॥

महा व्याकरणाचार्यः शिक्षा कल्प प्रवर्त्तकः ।
स्वच्छ छन्दोमयः स्वेच्छा स्वहितार्था विनाशनः ॥ ५९ ॥

साहसी सर्वहन्ता च सम्मतो ऽ निन्दितो ऽ सकृत् ।
कामरूपः कामपालः सुतीर्थ्यो ऽ थ क्षपाकरः ॥ ६० ॥

ज्वाली विशालश् च परो वेदकृज् जन वर्धनः ।
वेद्यो वैद्यो महावेदी वीरहा विषमो महः ॥ ६१ ॥

ईतिभानुर् ग्रहश् चैव प्रग्रहो निग्रहो ऽ ग्निहा ।
उत्सर्गः सन्निषेधश् च सुप्रतापः प्रताप धृत् ॥ ६२ ॥

सर्वायुध धरः शाली सुरूपः सप्रमोदनः ।
चतुष्किष्कुः सप्तपादः सिंह स्कन्धस् त्रिमेखलः ॥ ६३ ॥

सुधापान रतो ऽ रिघ्नः सुरमेड्यः सुलोचनः ।
तत्त्ववित् तत्त्वगोप्ता च परतत्त्वः प्रजाकरः ॥ ६४ ॥

ईशान ईश्वरो ऽ ध्यक्षो महामेरुर् अमोघधृक् ।
भेद प्रभेद वादी च स्वाद्वैत परिनिष्ठितः ॥ ६५ ॥

भागहारी वंशकरो निमित्तस्थो निमित्त कृत् ।
नियन्ता नियमो यन्ता नन्दको नन्दि वर्द्दनः ॥ ६६ ॥

षड् विम्शको महाविष्णुर् ब्रह्मज्ञो ब्रह्म तत्परः ।
वेदकृन् नाम चा ऽ नन्त नामा शब्दातिगः कृपः ॥ ६७ ॥

दंभो दंभकरो दंभ वंशो वंश करो वरः ।
अज निर्जनि कर्ता च सुराध्यक्षो युगान्तकः ॥ ६८ ॥

दर्भ रोमा बुधाध्यक्षो मानुकूलो मदोत्ततः ।
शन्तनुः शङ्करः सूक्ष्मः प्रत्ययः चण्ड शासनः ॥ ६९ ॥

वृत्तनासो महाग्रीवः कंबुग्रीवो महानृणः ।
वेदव्यासो देवभूतिर् अन्तरात्मा हृदालयः ॥ ७० ॥

महाभागो महास्पर्शो महामात्रो महामनाः ।
महोदरो महोष्ठश् च महाजिह्वो महामुखः ॥ ७१ ॥

पुष्करः तुंबुरुः खेटी स्थावरः स्थिति मत्तरः ।
श्वासायुधः समर्थश् च वेदार्थः सुसमाहितः ॥ ७२ ॥

वेदशीर्षः प्रकाशात्मा प्रमोदः साम गायनः ।
अन्तर्भाव्यो भावितात्मा महीदासो दिवस्पतिः ॥ ७३ ॥

महासुदर्शनो विद्वान् उपहार प्रियो ऽ च्युतः ।
अनलो द्विशफो गुप्तः शोभनो निरवग्रहः ॥ ७४ ॥

भाषाकरो महाभर्गः सर्वदेश विभागकृत् ।
कालकण्ठो महाकेशो लोमशः काल पूजितः ॥ ७५ ॥

आसेवनो ऽ वसानात्मा बुद्ध्यात्मा रक्त लोचनः ।
नारङ्गो नरकोद्धर्ता क्षेत्रपालो दुरिष्टहा ॥ ७६ ॥

हुङ्कार गर्भो दिग्वासाः ब्रह्मेन्द्राधिपतिर् बलः ।
वर्चस्वी ब्रह्मवदनः क्षत्रबाहुर् विदूरगः ॥ ७७ ॥

चतुर्थभाच् चतुष्पाच् च चतुर्वेद प्रवर्तकः ।
चातुर्होत्र कृद् अव्यक्तः सर्व वर्ण विभाग कृत् ॥ ७८ ॥

महापतिर् गृहपतिः विद्याधीशो विशांपतिः ।
अक्षरो ऽ धोक्षजो ऽ धूर्तो रक्षिता राक्षसान्त कृत् ॥ ७९ ॥

रजः सत्त्व तमो हन्ता कूटस्थः प्रकृतेः परः ।
तीर्थ कृत् तीर्थवासी च तीर्थरूपी ह्यपां पतिः ॥ ८० ॥

पुण्यबीजः पुराणर्षिः पवित्रः परमोत्सवः ।
शुद्धि कृच् छुद्धितः शुद्धः शुद्ध सत्त्व निरूपकः ॥ ८१ ॥

सुप्रसन्नः शुभार्हो ऽ थ शुभदित्सुः शुभप्रियः ।
यज्ञ भाग भुजां मुख्यो यक्ष गान प्रियो बली ॥ ८२ ॥

समो ऽ थ मोदो मोदात्मा मोददो मोक्षदः स्मृतिः ।
परायणः प्रसादश् च लोक बन्धुर् बृहस्पतिः ॥ ८३ ॥

लीलावतारो जनन विहीनो जन्म नाशनः ।
महाभीमो महाकर्त्तो महेष्वासो महोदयः ॥ ८४ ॥

अर्जुनो भासुरः प्रख्यो विदोषो विष्ट्रश्रवाः ।
सहस्रपात् सभाग्यश् च पुण्यपाको दुरव्ययः ॥ ८५ ॥

कृत्यहीनो महावाग्ग्मी महापाप विनिग्रहः ।
तेजो ऽ पहारी बलवान् सर्वदा ऽ रि विदूषकः ॥ ८६ ॥

कविः कण्ठ गतिः कोष्ठो मणि मुक्ता जलाप्लुतः ।
अप्रमेय गतिः कृष्णो हंसश् चैव शुचिप्रियः ॥ ८७ ॥

विजयीन्द्रः सुरेन्द्रश् च वागीन्द्रो वाग्पतिः प्रभुः ।
तिरश्चीन गतिः शुक्लः सारग्रीवो धराधरः ॥ ८८ ॥

प्रभातः सर्वतोभद्रो महाजन्तुर् महौषधिः ।
प्राणेशो वर्धकस् तीव्र प्रवेशः पर्वतोपमः ॥ ८९ ॥

सुधा सिक्तः सदस्यस्थो राजराट् दण्डकान्तकः ।
ऊर्ध्वकेशो ऽ जमीढश् च पिप्पलादो बहुश्रवाः ॥ ९० ॥

गन्धर्वो ऽ भ्युदितः केशी वीरपेशो विशारदः ।
हिरण्यवासाः स्तब्धाक्षो ब्रह्म लालित शैशवः ॥ ९१ ॥

पद्मगर्भो जंबुमाली सूर्य मण्डल मध्यगः ।
चन्द्र मण्डल मध्यस्थः करभागा ऽ ग्नि संश्रयः ॥ ९२ ॥

अजीकर्त्तः शाकलग्र्यः सन्धानः सिंह विक्रमः ।
प्रभावात्मा जगत् कालः कालकालो बृहद्रथः ॥ ९३ ॥

सारङ्गो यतमान्यश् च सत्कृतिः शुचि मण्डलः ।
कुमारजिद् वनेचारी सप्त कन्या मनोरमः ॥ ९४ ॥

धूमकेतुर् महाकेतुः पक्षिकेतुः प्रजापतिः ।
ऊर्ध्वरेता बलोपायो भूतावर्त्तः सजङ्गमः ॥ ९५ ॥

रविर् वायुर् विधाता च सिद्धान्तो निश्चलो ऽ चलः ।
आस्थानकृद् अमेयात्मा ऽ नुकूलश् चा ऽ धिको भुवः ॥ ९६ ॥

ह्रस्वः पितामहो ऽ नर्थो कालवीर्यो वृकोदरः ।
सहिष्णुः सहदेवश् च सर्वजिच् छत्रु तापनः ॥ ९७ ॥

पाञ्चरात्र परो हंसी पञ्चभूत प्रवर्त्तकः ।
भूरिश्रवाः शिखण्डी च सुयज्ञः सत्य घोषणः ॥ ९८ ॥

प्रघातः प्रणवो हारी प्रमाण प्रणवो निधिः ।
महोपनिषदो वाक् च वेदनीडः क्रीड धृत् ॥ ९९ ॥

भवरोग भिषग् भावो भावसाध्यो भवातिगः ।
षड् धर्म वर्जितः केशी कार्यवित् कर्म गोचरः ॥ १०० ॥

यम विध्वंसनः पाशी यमि वर्ग निषेवितः ।
मतङ्को मेचको मेध्यो मेधावी सर्व मेलकः ॥ १०१ ॥

मनोज्ञ धृष्टिर् मारारिः निग्रहः कमलाकरः ।
नमद् गणेशो गोपीठः सन्तानः सन्तति प्रदः ॥ १०२ ॥

बहुप्रदो बलाध्यक्षो भिन्न मर्याद भेदनः ।
अनिर्मुक्तश् चारुदेष्णः सत्याषाढः सुराधिपः ॥ १०३ ॥

आवेदनीयो ऽ वेद्यश् च तारणस् तरुणो ऽ रुणः ।
सर्व लक्षण लक्षण्यो सर्व लोक विलक्षणः ॥ १०४ ॥

सर्व दक्षः सुधाधीशः शरण्यः शान्त विग्रहः ।
रोहिणीशो वराहश् च व्यक्ता ऽ व्यक्त स्वरूप धृत् ॥ १०५ ॥

स्वर्गद्वारः सुखद्वारः मोक्षद्वारः त्रिविष्टपः ।
अद्वितीयः केवलश् च कैवल्य पतिर् अर्हणः ॥ १०६ ॥

तालपक्षस् तालकरो यन्त्री तन्त्र विभेदनः ।
षड्रसः कुसुमास्त्रश् च सत्य मूल फलोदयः ॥ १०७ ॥

कला काष्ठा मुहूर्तश् च मणि बिम्बो जगद्घृणिः ।
अभयो रुद्र गीतश् च गुणजित् गुण भेदनः ॥ १०८ ॥

देवासुर विनिर्माता देवासुर नियामकः ।
प्रारंभश् च विरामश् च साम्राज्याधिपतिः प्रभुः ॥ १०९ ॥

पण्डितो गहनारंभो जीवनो जीवनप्रदः ।
रक्तदेवो देवमूलो वेदमूलो मनः प्रियः ॥ ११० ॥

विरोचनः सुधाजातः स्वर्गाध्यक्षो महा कपिः ।
विराड्रूपः प्रजारूपः सर्व देव शिखामणिः ॥ १११ ॥

भगवान् सुमुखः स्वर्गो मञ्जुकेशः सुतुन्दिलः ।
वनमाली गन्धमाली मुक्त माल्यश्चलोपमः ॥ ११२ ॥

मुक्तो ऽ सृप्यः सुहृद् भ्राता पिता माता परा गतिः ।
सत्त्व ध्वनिः सदा बन्धुर् ब्रह्म रुद्रादि दैवतम् ॥ ११३ ॥

समात्मा सर्वदः साङ्ख्यः सन्मार्ग ध्येय सत्पदः ।
ससङ्कल्पो विकल्पश् च कर्त्ता स्वादी तपोधनः ॥ ११४ ॥

विरजो विरजानाथः स्वच्छ श्रृञ्गो दुरिष्टहा ।
घोणो बन्धुर् महाचेष्टः पुराणः पुष्करेक्षणः ॥ ११५ ॥

अहिर्बुध्न्यो मुनिर् विष्णुः धर्मयूपः तमोहरः ।
अग्राह्यः शाश्वतः कृष्णः प्रवरः पक्षि वाहनः ॥ ११६ ॥

कपिलः खपथिस्थश् च प्रद्युम्नो ऽ मित भोजनः ।
सङ्कर्षणो महावायुः त्रिकालज्ञः त्रिविक्रमः ॥ ११७ ॥

पूर्णःप्रज्ञः सुधीर् हृष्टः प्रबुद्धः शमनः सदः ।
ब्रह्माण्ड कोटि निर्माता माधवो मधुसूदनः ॥ ११८ ॥

शश्वदेक प्रकाशश् च कोटि ब्रह्माण्ड नायकः ।
शश्वद् भक्त पराधीनः शश्वद् आनन्द दायकः ॥ ११९ ॥

सदानन्दः सदाभासः सदा सर्व फल प्रदः ।
ऋतुमान् ऋतुपर्णश् च विश्वनेता विभूत्तमः ॥ १२० ॥

रुक्माङ्गद प्रियो ऽ व्यङ्गो महालिङ्गो महाकपिः ।
संस्थान स्थानदः स्रष्टा जाह्नवीवाह धृक् प्रभुः ॥ १२१ ॥

माण्डुकेष्ट प्रदाता च महा धन्वन्तरिः क्षितिः ।
सभापतिः सिद्धमूलः चरकादिर् महापदः ॥ १२२ ॥

आसन्न मृत्यु हन्ता च विश्वास्यः प्राण नायकः ।
बुधो बुधेज्यो धर्मेज्यो वैकुण्ठ पतिर् इष्टदः ॥ १२३ ॥

## ॥ फल श्रुतिः ॥

इति श्वेत वराहस्य प्रोक्तं हे गिरि कन्यके ।
समस्त भाग्यदं पुण्यं भूपतिव प्रदायकम् ॥ १२४ ॥

महा पातक कोटिघ्नं राजसूय फल प्रदम् ।
य इदं प्रातरुत्थाय दिव्यं नाम सहस्रकम् ॥ १२५ ॥

पठते नियते भूत्वा महा पापैः प्रमुच्यते ।
सहस्र नामभिर् दिव्यैः प्रत्यहं तुलसी दलैः ॥ १२६ ॥

पूजयेद् यो वराहं तु श्रद्धया निष्ठया ऽ न्वितः ।
एवं सहस्र नामभिः पुष्पैवार्थ सुगन्धिभिः ॥ १२७ ॥

अभिजात कुले जातो राजा भवति निश्चयम् ।
एवं नाम सहस्रेण वराहस्य महात्मनः ॥ १२८ ॥

न दारिद्र्यं अवाप्नोति न याति नरकं धृवम् ।
त्रिकालं एककालं वा पठन् नाम सहस्रकम् ॥ १२९ ॥

मासं एकं जपेन् मर्त्यो भविष्यति जितेन्द्रियः ।
महतीं श्रियं आयुष्यं विद्यां चैवा ऽ तिगच्छति ॥ १३० ॥

यो वा श्वेतवराहस्य दिव्यैर् नाम सहस्रकैः ।
प्रवर्त्तयेन् नित्य पूजां दत्त्वा निर्वाहं उत्तमम् ॥ १३१ ॥

भवेज् जन्म सहस्रैस् तु साम्राज्याधिपतिर् धृवम् ।
रात्रौ श्वेतवराहस्य सन्निधौ य इदं पठेत् ॥ १३२ ॥

क्षया ऽ पस्मार कुष्ठाद्यैर् महारोगैः तथा ऽ परैः ।
मासाद् एव विनिर्मुक्तः स जीवेच् छरदां शतम् ॥ १३३ ॥

सर्वेषु पुण्य कालेषु पठन् नाम सहस्रकम् ।
सर्व पाप विनिर्मुक्तः लभते शाश्वतं पदम् ॥ १३४ ॥

सहस्र नाम पठनाद् वराहस्य महात्मनः ।
न ग्रहोपद्रवं याति याति शत्रु क्षयं तथा ॥ १३५ ॥

राजा च दासतां याति सर्वे यान्ति च मित्रताम् ।
श्रियश् च स्थिरतां यान्ति यान्ति सर्वे ऽ पि सौहृदम् ॥ १३६ ॥

राजदस्युग्रहादिभ्यो व्याध्याधिभ्यश् च किञ्चन ।
न भयं जायते क्वापि वृद्धिस् तस्य दिने दिने ॥ १३७ ॥

विप्रस् तु विद्यां आप्नोति क्षत्रियो विजयी भवेत् ।
वार्धुष्य विभवं याति वैश्यः शूद्रः सुखं व्रजेत् ॥ १३८ ॥

सकामः कामं आप्नोति निष्कामो मोक्षं आप्नुयात् ।
महाराक्षस बेताल भूत प्रेत पिशाचकाः ॥ १३९ ॥

रोगाः सर्प विषाद्याश् च नश्यन्त्यस्य प्रभावतः ।
य इदं शृणुयान् नित्यं यश्चापि परिकीर्तयेत् ॥ १४० ॥

ना ऽ मङ्गलं अवाप्नोति सो ऽ मुत्रेह च मानवः ॥ १४१ ॥

नमः श्वेत वराहाय नमस्ते परमात्मने ।
लक्ष्मी नाथाय नाथाय श्रीमुष्ण ब्रह्मणे नमः ॥ १४२ ॥

यः पठेच् छृणुयान् नित्यं इमं मन्त्रं नगात्मजे ।
स पाप पाश निर्मुक्तः प्रयाति परमां गति ॥ १४३ ॥

---

**॥ इति श्री स्कान्द पुराणे श्री वराह सहस्र नाम स्तोत्रं सम्पूर्णम् ॥**